# आदर्श-प्रश्न-पत्रम्-2019-20

## कक्षा : दशमी

## संस्कृतम् (122)

## मॉडल पेपर-10

**समयः- होरात्रयम्** **सम्पूर्णांकाः-80**

---

**सामान्यनिर्देशाः-**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमांकः अवश्यं लेखनीयः।
4. अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम्-**

**खण्ड : क : अपठित-अवबोधनम्** **10 अंकाः**

**खण्ड : ख : रचनात्मककार्यम्** **15 अंकाः**

**खण्ड : ग : अनुप्रयुक्तव्याकरणम्** **25 अंकाः**

**खण्ड : घ : पठित-अवबोधनम्** **30 अंकाः**

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
(iii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
(v) प्रश्नानाम् निर्देशाः ध्यानेन अवश्यं पठनीयाः।

---

## खण्डः - क 10 अंकाः

## अपठित-अवबोधनम्

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** **10**

कालिदासस्य नाम को न जानाति। महाकवेः न केवलं भारतवर्षे अपितु समस्ते भूतले महती प्रसिद्धिः। अयं हि कविकुलगुरूः कथ्यते। आंग्लदेशवासिनः तं 'शेक्सपीयर' इति कथयन्ति। इटलीदेशवासिनः तस्य तुलनां स्वकीय दांतैः व जिलाभ्यां सह कुर्वन्ति! जर्मनी देशवासिनः तु तं विश्वकविं स्वीकुर्वन्ति। एषः कविः कदा कुत्र च अभवत् इति स्पष्टरूपेण कथयितुं न शक्नुमः। परमेतत् कथ्यते यत् अयं महाराजस्य विक्रमादित्यस्य नवरत्नेषु सर्वश्रेष्ठः कविः आसीत्। अस्य महाकवेः विषये एका जनश्रुतिः श्रुता यत् सः जन्मना महामूर्खः आसीत्। केचित् धूर्ताः पंडिताः तस्य विवाहं कयापि विदुष्या राजकन्यया सह अकारयन्।

अस्य कृतीनां भाषा तु अतीव सरला, सुकोमला, स्वभाविकी अस्ति। कालिदासः संस्कृतभाषायाः गौरवम्, भारतस्य कवीनां गौरवम् भारतीय संस्कृतेः च गौरवम् अस्ति।

1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) $1 \times 2 = 2$
   (i) के कालिदासं 'शेक्सपीयर' इति कथयन्ति?
   (ii) जर्मनी देशवासिनः तु कं विश्वकविं स्वीकुर्वन्ति?
   (iii) कविकुलगुरुः कः कथ्यते?
2. पूर्णवाक्येन लिखत- (केवलं प्रश्नद्वयम्) $2 \times 2 = 4$
   (i) कालिदासस्य कृतीनां भाषा कीदृशी अस्ति?
   (ii) महाकवेः विषये कीदृशी जनश्रुतिः वर्तते?

(iii) कालिदासः कस्य नवरत्नेषु सर्वश्रेष्ठः कवि आसीत्?

3. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1

4. यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$

(i) 'अकारयन्' इति क्रियापदस्य किं कर्तृपदम्?
  (क) आंग्लदेशवासिनः
  (ख) इटलीदेशवासिनः
  (ग) पण्डिताः

(ii) 'महती' इति विशेषणपदस्य विशेष्यपदं किम्?
  (क) समस्तं
  (ख) भूतल
  (ग) प्रसिद्धिः

(iii) 'किंवदन्ती' इति पदस्य पर्यायपदं गद्यांशे किम् प्रयुक्तम्?
  (क) स्वीकुर्वन्ति
  (ख) कथयन्ति
  (ग) जनश्रुतिः

(iv) 'कठिना' इति पदस्य कृते किं विलोमपदं गद्यांशे प्रयुक्तम्?
  (क) सरलां
  (ख) कोमला
  (ग) एका

## खण्डः – ख 15 अंकाः

## रचनात्मककार्यम्

2. **भवान् सिंधुलः। पुस्तक-प्रदर्शनी दृष्ट्वा स्वानुभवं मित्रं प्रति लिखिते अस्मिन् पत्रे मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि पूरयित्वा पत्रं च पुनः लिखत।** $\frac{1}{2} \times 10 = 5$

दयानन्द छात्रावासः
नवदिल्लीतः
दिनांकः ..........
प्रिय मित्रम् राहुल!
(1) .........।
अत्र कुशलं तत्रास्तु। गत सप्ताहे अहं पुस्तक-प्रदर्शनीं द्रष्टुम् छात्रैः अध्यापकैः च सह गतवान्। तत्र अहं ज्ञान-विज्ञानस्य असीमितं भण्डारं (2) .......... आश्चर्यचकितः अभवम्। ज्ञानस्य काचित् सीमा नास्ति। न केवलं तत्र (3) .......... अपितु गणितश-ास्त्रस्य, इतिहासस्य, भाषाविज्ञानादीनाम् अपि (4) ........... सन्ति। तत्र ललितकलादिविषयाणाम् अपि (5) .......... आसीत्। कथा-साहित्यस्य ललित-बाल-कथानाम् तु सागरमेव तत्र वयम् अपश्याम। प्रतिदिनं अस्माभिः पुस्तकम् अवश्यं (6) ..........। पठनेन अस्माकं ज्ञानवर्धनं (7) .......... अपि भवति। त्वमपि सदैव पुस्तकानां पठनाय प्रयत्नं (8) ..........। पुस्तकानि अस्माकं मित्राणि।
अनुजाय स्नेहः अग्रजेभ्यः (9) ..........।
तव मित्रम्
(10) ..........।

| मञ्जूषा |
|---|
| पठनीयम्, कुरु, नमो नमः, ज्ञानविज्ञानस्य, प्रणामाः, पुस्तकानि, सिन्धुलः, दृष्ट्वा, संग्रहः, मनोरंजनम् |

**3.** **अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत–** $1 \times 5 = 5$



| |
|---|
| **मञ्जूषा–**जलागमः, मण्डूकः, जलप्लावः, कुल्याः, शिशवः, आनन्दम्, हरीतिमा, कर्गदनौकाः, केकारवं, हर्षिताः, भूमितापः, गगनं, नश्यति। |

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत–** $1 \times 5 = 5$

**''लघुवाटिकायाः''**

| |
|---|
| **मञ्जूषा–**छात्राः, बालकाः, पुरूषाः, कुर्वन्ति, वानरः, वृक्षाः, फलहीनाः, आतपः, लभन्ते, सायं, चन्द्रमाः। |

**4.** **अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत– (केवलं वाक्यपञ्चकम्)** $1 \times 5 = 5$

1. तुम सबने उसकी रक्षा की।
   All of you have protected him.
2. समाचार रिपोर्टर का मुख्य काम समाचार एकत्र करना है।
   The main job of the news reporter is to collect the news.
3. हम सब प्रयाग जाएँगे।
   All of us will go to Prayag.
4. समुद्र का पानी खारा है।
   Sea water is salty.
5. सैनिक घोड़े से गिरता है।
   Soldier falls from the horse.
6. मैने घने जंगल में एक बाघ को देखा।
   I saw a tiger in the dense forest.
7. दुष्यन्त की पत्नी शकुन्तला थी।
   The wife of Dushyant was Shakuntala.

## खण्डः ग **25 अंकाः**

## अनुप्रयुक्तव्याकरणम्

**5.** **अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत– (केवलं प्रश्नचतुष्टयम्)** $1 \times 4 = 4$

1. बालोऽपि विद्यालयं गच्छति।
2. सन्निधानम् सन्तोषे एव भवति।
3. प्रिय + छात्राः शृण्वन्तु।
4. सकलं ब्रह्माण्डं व्याकुलं सञ्जातम्।
5. निः + उपायाः सेवकाः तूष्णीम् अतिष्ठन्।

**6. अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्)** $1 \times 4 = 4$

1. अहं कालः विश्वस्य आत्मा अस्मि।
   (क) विश्वात्मा
   (ख) विश्वस्यात्मा
   (ग) विश्वेत्मा
2. माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
   (क) अक्षरव्यक्तिः
   (ख) क्षरव्यक्तिः
   (ग) अक्षराणाम् व्यक्तिः
3. सकलं ब्रह्माण्डं व्याकुलं सञ्जातम्।
   (क) ब्रह्मणस्य अंडम्
   (ख) ब्रह्मणः अण्डम्
   (ग) ब्रह्मणाय अंडम्
4. प्रतिचक्रम् उत्कीर्णम् अस्ति।
   (क) प्रत्यचक्रम्
   (ख) चक्रम् प्रति
   (ग) चक्रं चक्रं प्रति
5. माता च पिता च आगच्छतः।
   (क) मातृपितरौ
   (ख) मातापिता
   (ग) मातापितरौ

**7. अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्)** $1 \times 4 = 4$

1. गायिका मधुरं गीतं गायति।
   (क) गै + इका
   (ख) गायक + टाप्
   (ग) गायिक + आ
2. अहमेव जगतः उत्पत्ति-विकास-प्रलयानां च साक्षी अस्मि।
   (क) साक्ष् + ङीप्
   (ख) साक्ष + ईन्
   (ग) साक्ष + इन्
3. बलवती हि आशा।
   (क) बल + वती
   (ख) बल + क्तवतु
   (ग) बल + मतुप्
4. तदेव महात्मानः तथ्यतः समत्त्वम् इति आहुः।
   (क) सम + त्वम्
   (ख) सम + त्व
   (ग) सम + त्वाम्
5. शत्रु + तल् न करणीया।
   (क) शत्रुत्वं
   (ख) शत्रुता
   (ग) शत्रुतल्

**8. मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत–** $1 \times 3 = 3$

कोमलः– त्वं किम् पिबसि?

सोनलः– मया आम्ररसः (1) ..........।

कोमलः– किं त्वं गीतं अपि गायसि?

सोनलः– आम्, (2) .......... गीतं अपि गीयते।

कोमलः– किम् रामः उपहारान् ददाति?

सोनलः– आम्, रामेण (3) .......... दीयन्ते।

कोमलः– किम् रामः पाठं पठति?

सोनलः– आम्, तेन पाठः पठ्यते।

| मञ्जूषा |
|---|
| उपहाराः, पीयते, मया। |

**अथवा**

**अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत (केवलं त्रयाणाम्)–**

1. अहं श्लोक पठामि।
2. सः प्रश्नं पृच्छति।
3. शिष्याः गुरुः प्रणमन्ति।
4. बालाः कोलाहलं कुर्वन्ति।
5. त्वं पाठशालां गच्छसि।

**9. कालबोधकशब्दैः अधोलिखित– दिनचर्यां वा पूरयत– (केवलं प्रश्नचतुष्टयम्)** $1 \times 4 = 4$

1. प्रातः 6:00 ......... वादने शताब्दी रेलयानम् चलति।
2. अपराह्णे 12:45 .......... वादने गोमती रेलयानम् चलति।
3. सायं 8:15 ......... वादने वैशाली रेलयानम् चलति।
4. रात्रौ 10:30 .......... वादने लखनऊ मेलयानम् चलति।
5. रात्रौ 11:00 .......... वादने हरिद्वार मेलयानम् चलति।

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत– (केवलं प्रश्नषटकम्)** $1/2 \times 6 = 3$

1. अद्य सायं .......... हिमपातः जातः।
2. समुद्रेषु वृष्टिः ..........।
3. त्वं ......... कुत्र गच्छसि?
4. .......... अहम् भ्रमणाय गमिष्यामि।
5. पश्य वानराः वृक्षेषु .......... कूर्दन्ति।
6. जननी जन्म भूमिश्च स्वर्गाद् .......... गरीयसी।
7. कच्छपः तु ......... चलति।
8. कुक्कुराः जीवान् दृष्ट्वा ......... शब्दं कुर्वन्ति।

| मञ्जूषा |
|---|
| अपि, अधुना, इदानीम्, शनैः, सहसा, इतस्ततः, उच्चैः, वृथा। |

**11. अधोलिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नत्रयम्)** $1 \times 3 = 3$

1. वृक्षात् अनेकानि फलानि पतति। (पतिष्यति/पतन्ति/पतेत्)
2. ह्यः मम अम्बायाः विद्यालये क्रीडादिवसः भविष्यति। (आसीत्/अभविष्यत्/अस्तु)
3. चलचित्रम् दृष्ट्वा वयम् उच्चैः हसन्ति। (हसावः/हसामः/हसामि)
4. किं त्वम् श्वः चेन्नईनगरतः आगच्छः? (आगमिष्यसि/आगमिष्यति/आगमिष्यामि)

## खण्डः – घ 30 अंकाः

## पठित–अवबोधनम्

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **5**

निद्राभङ्गदुःखेन वनराजः सन्नपि तुच्छजीवैः आत्मनः एतादृश्या दुरवस्थया श्रान्तः सर्वजन्तून् दृष्ट्वा पृच्छति–

सिंहः – (क्रोधेन गर्जन्) भोः! अहं वनराजः किं भयं न जायते ?किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा?

एकः वानरः – यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः। राजा तु रक्षकः भवति परं भवान् तु भक्षकः। अपि च स्वरक्षायामपि समर्थः नासि तर्हि कथमस्मान् रक्षिष्यसि?

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) राजा कीदृशः भवति?
   (ii) सर्वे वानराः कम् तुदन्ति स्म?
   (iii) भक्षकः कः आसीत्?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) कीदृशः सन्नपि सिंहः तुच्छजीवैः पीडितः आसीत्?
   (ii) सिंहः कस्मिन् समर्थः नासीत्?
3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'विलोक्य' इत्यस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?
      (क) दृष्ट्वा
      (ख) सन्
      (ग) श्रान्तः
   (ii) 'पृच्छति' इति पदस्य कर्तृपदं किम्?
      (क) वानरः
      (ख) वनराजः
      (ग) भवान्
   (iii) 'दुरवस्थया'ः इति पदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम्?
      (क) श्रान्तः
      (ख) तुच्छः
      (ग) एतादृश्या
   (iv) 'राजा' इति कर्तृपदस्य क्रियापदं किम्?
      (क) भवति
      (ख) असि
      (ग) पृच्छति

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **5**

वायुमंडलं भृशं दूषितं न हि निर्मलं जलम्।
कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्।
करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) भक्ष्यं समलं किम्?
   (ii) किम् भृशं दूषितम् अस्ति?
   (iii) बहिरन्तर्जगति किं करणीयम्।।
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) कीदृशं जलं नास्ति?
   (ii) भक्ष्यं कीदृशम्?
3. निर्देशानुसारम् उत्तरत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$

(i) 'समलं धरातलम्' अत्र विशेषण पदं किम्?
 (क) समलं
 (ख) धरातलं
 (ग) निर्मलं

(ii) 'अशुद्धीकरणं' इत्यस्य विलोमपदं पद्यांशे किं प्रयुक्तम्?
 (क) बहु
 (ख) धरातलम्
 (ग) शुद्धीकरणम्

(iii) 'स्वच्छम्' इति पदस्य पर्यायपदं पद्यांशे किं प्रयुक्तम्?
 (क) वायुमण्डलम्
 (ख) निर्मलं
 (ग) जलम्

(iv) 'बहिरन्तर्जगति तु बहु...।' अस्मिन् वाक्ये क्रियापदम् अस्ति?
 (क) करणीयम्
 (ख) निर्मलं
 (ग) भक्ष्य

**14. अधोलिखितं नाटयांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **5**

लवः–ननु भगवान् वाल्मीकिः।
रामः–केन सम्बन्धेन?
लवः–उपनयनोपदेशेन।
रामः–अहमत्रभवतोः जनकं नामतो वेदितुमिच्छामि।
लवः–न हि जानाम्यस्य नामधेयम्। न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति।
रामः–अहो माहात्म्यम्।
कुशः–जानाम्यहं तस्य नामधेयम्।
रामः–कथ्यताम्।
कुशः–निरनुक्रोशो नाम.....
रामः–वयस्य, अपूर्वं खलु नामधेयम्।
विदूषकः–(विचिन्त्य) एवं तावत् पृच्छामि निरनुक्रोश इति क एवं भणति?
कुशः–अम्बा।
विदूषकः–किं कुपिता एवं भणति, उत प्रकृतिस्था?
कुशः–यद्यावयोर्बालभावजनितं कञ्चिदविनयं पश्यति तदा एवम् अधिक्षिपतिनिरनुक्रोशस्य पुत्रौ, मा चापलम् इति।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
 (i) कुशलवयोः गुरोः किन्नाम?
 (ii) लवः कस्य नामधेयं न जानाति?
 (iii) रामः कयोः जनकं नामतो वेदितुमिच्छति?

2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
 (i) कुशः स्वस्य पितुः किन्नाम कथयति?
 (ii) तपोवने कश्चिदपि कस्य नाम न व्यवहरति?

3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
 (i) 'कश्चित् इति पदस्य किं क्रियापदं नाट्यांशे प्रयुक्तम्?
 (क) व्यवहरति
 (ख) पृच्छामि
 (ग) जानामि

(ii) नाट्यांशे 'जानामि' इति क्रियायाः कर्तृपदं किम्?
  (क) अहम्
  (ख) विदूषकः
  (ग) रामः
(iii) 'अस्मिन् तपोवने' इत्यत्र विशेष्यपदं किम्?
  (क) अस्मिन्
  (ख) तपोवने
  (ग) उभौ
(iv) नाट्यांशे 'विनयम्' इत्यस्य विलोमपदं किं प्रयुक्तम्?
  (क) भणति
  (ख) कुपिता
  (ग) अविनयम्

**15. रेखांकित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत- (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. संसारे जीवितं दुर्वहं जातम्।
2. महानगरमध्ये अनिशं कालायसचक्रं प्रचलति।
3. कालायसचक्रं तनुः पेषयद् सदा वक्रं भ्रमति।
4. अमुना दुर्दान्तैः दशनैः जनग्रसनं नैव स्यात्।
5. वाष्पयानमाला ध्वानम् वितरन्ती संधावति।

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकयोः अन्वयं पूरयत-** $1/2 \times 4 = 2$

I. प्राणिनां जायते हानिः परस्परविवादतः।
अन्योन्यसहयोगेन लाभस्तेषां प्रजायते।।

**अन्वयः-** परस्पर (1) .......... प्राणिनां (2) .......... जायते। अन्योन्य (3) .......... तेषां (4) .......... प्रजायते।

II. आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः।।

**अन्वयः-** आचारः (1) .......... धर्मः, इत्येतद् (2) .......... वचः (अस्ति)। तस्मात् (3) .......... प्राणेभ्योऽपि (4) .......... रक्षेत्।

| **मञ्जूषा** |
|---|
| सहयोगेन, विवादतः, लाभः, हानिः, विशेषतः, प्रथमः, सदाचारं, विदुषां। |

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत-** $1 \times 4 = 4$

विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्।
अश्वश्चेद् धावने वीरः भारस्य वहने खरः।।

**भावार्थः-** अयं संसारः विचित्रं वर्तते। संसारे किमपि .......... (सारहीनं) नास्ति। प्रत्येकस्मिन् भिन्नं-भिन्नं किमपि ......... भवति एव। यथा अश्वः यदि धावने वीरः भवति तर्हि .........भारवहने निपुणः भवति। अत एव अस्माभिः प्रत्येकस्य गुणं दृष्ट्वा तस्य योग्यतायाः सम्मानः .......... करणीयः।

| |
|---|
| **मञ्जूषा-** उपयोगश्च, निरर्थकं, वैशिष्ट्यं, गर्दभोऽपि |

**17. अधोलिखित-कथांशं समुचित-क्रमेण लिखत-** $1/2 \times 8 = 4$

1. अयि शुभे! किमेवं रोदिषि? उच्चताम्।
2. सुरभे रिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत्।
3. क्रुद्धः कृषीवलः तमुत्थापथितुं बहुवारम् यत्नमकरोत्।

4. भूमौ पतिते स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः आश्रूणि आविसारन्।
5. सः वृषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात।
6. कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्ततः।
7. तयोः बलिवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्।
8. कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्।

**18.** **'क' स्तम्भे लिखितानां पदानां पर्यायपदानि 'ख' स्तम्भे लिखितानि सन्ति। तानि यथासमक्षं लिखत–** $1 \times 3 = 3$
(केवलं प्रश्नत्रयम्)

| क | ख |
|---|---|
| वृषः | आगताः |
| आविरासन् | वृषभः |
| सुराधिपः | भिन्नम् |
| इतरम् | इन्द्रः |

**अथवा**

**अधोलिखितवाक्येषु रेखांकितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत– (केवलं प्रश्नत्रयम्)** $1 \times 3 = 3$

1. सर्पः भयंकरः भवति।
   (क) नरः
   (ख) उरगः
   (ग) सरः
2. सः तूर्णं धावति।
   (क) उच्चैः
   (ख) शीघ्रम्
   (ग) शनैः
3. पशुपति मस्तके चन्द्रः शोभते।
   (क) शिवः
   (ख) विष्णुः
   (ग) कृष्णः
4. राक्षस धनानन्दस्य अमात्यः आसीत्।
   (क) राजकवि
   (ख) सेनापति
   (ग) मन्त्री

WWW.CBSE.ONLINE

Download Solved Version of this unsolved paper from
www.cbse.online

This sample paper has been released by website www.cbse.online for the benefits of the students. This paper has been prepared by subject expert with the consultation of many other expert and paper is fully based on the exam pattern for 2019-2020. Please note that website www.cbse.online is not affiliated to Central board of Secondary Education, Delhi in any manner. The aim of website is to provide free study material to the students.